त। इत्यान्तसादित्वायं षोपदेश एव न्याय्यः।

**स्नु** पु० सानु+स्नु आदेशः स्ना—स्नु वा। १पर्वतस्य समभूभागे अमरः २स्नायौ च। "त्रिष्टुप् मांसात् स्नुतोऽनुष्टुप्" भाग० ३।१२अ०। "स्नुतः स्नायुतः" इति श्रीधरः।

**स्नुक्छद** पु० स्नु द्यति स्नुह-क्विप् कुत्वम् स्नुक् छदोऽस्य। क्षीरकञ्चुकीवृक्षे राजनि०।

**स्नुत** पु० स्नु-क्त। क्षरिते जलादौ अमरः। [शब्दर०।

**स्नुषा** स्त्री स्नु-सक्। १पुत्रवध्वाम् अमरः २स्नुहीवृक्षे च

**स्नुह्(हा)** स्त्री स्नुह-क्विप् वा टाप्। स्नुहीवृक्षे अमरः।

**स्नुहि(ही)** स्नुह-इन् वा ङीप्। (मनसासिज्) वृक्षे अमरः "स्नुहीविटपसंश्रिताम्" ति०त० देवीपु०।

**स्नेह** पु० स्निह-घञ्। १प्रेम्णि अमरः २तैलादिरसभेदे ३न्यायोक्ते गुणभेदे च यद्वशात् दाहानुकूल्यम्। स च गुणः जलस्य चूर्णादिपिण्डीभावहेतुः। "जले मधुरशीतलौ। स्नेहस्तत्र द्रव्यत्वन्तु सांसिद्धिकमुदाहृतम्" भाषा०। "घृतादावपि तदन्तर्वर्त्तिजलस्यैव स्नेहः जलस्य स्नेहसमवायिकारणत्वात् तेन जल एव स्नेह इति मन्तव्यम्" मुक्ता०। "स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ। तैलान्तरे तत्प्रकर्षात् दहनस्यानुकूलता" भाषा०। "ननु पृथिव्यामपि तैले स्नेह उपलभ्यते न चासौ जलीयः तथा सति दहनप्रातिकूल्यं स्यादत आह तैलान्तरे इति तत्प्रकर्षात् स्नेहप्रकर्षात्। तैले उपलभ्यमानः स्नेहोऽपि जलीय एव तस्य प्रकर्षादग्नेरानुकूल्यम्। अपकृष्टस्नेहं हि जलं वह्निं नाशयतीति भावः" मुक्ता०। ४प्रेमरूपस्नेहस्य वत्सलरसस्य स्थायिभावः स च रसः भरतसम्मतः सा०द० उक्तो यथा "स्फुटं चमत्कारितया वत्सलञ्च रसं विदुः। स्थायी वत्सलता स्नेहः पुत्राद्यालम्बनं मतम्। उद्दीपनानि तच्चेष्टा विद्याशौर्यदयादयः। आलिङ्गनाङ्गसंस्पर्शशिरश्चुम्बनमीक्षणम्। पुलकानन्दवाष्पाद्या अनुभावाः प्रकीर्त्तिताः। सञ्चारिणोऽनिष्टशङ्काहर्षगर्वादयो मताः। पद्मगर्भच्छविवर्णो दैवतं लोकमातरः"। "अपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम्। परोपकारनिरता मणिदीपा इवोत्तमाः" उद्भ०।

**स्नेहन्** पु० स्निह कनिन् नि० गुणारामभेदे उणा०।

**स्नेहन** न० स्निह-णिच्-ल्युट्। १तैलादिमर्दने अभ्यङ्गे राजनि० २स्निग्धतासाधने क्रियाभेदे भावप्र० तत्प्रकार उक्तो यथा "स्नेहनविधिः "स्नेहश्चतुर्विधः प्रोक्तो घृतं तैलं वसा तथा। मज्जा च तं पिबेन्मर्त्यः किञ्चिदभ्युदिते रवौ। स्थावरो जङ्गमश्चैव द्वियोनिः स्नेह उच्यते। तिलतैलं स्थावरेषु जङ्गमेषु घृतं वरम्। द्वाभ्यां त्रिभिश्चतुर्भिर्वा यमकस्त्रिवृतो महान्"। अस्यायमर्थः द्वाभ्यां स्नेहाभ्यां घृततैलाभ्यां यमकाख्यः स्नेहः स्यात्। त्रिभिः स्नेहैः घृततैलवसाभिरूपैः त्रिवृताख्यः स्यात्। चतुर्भिर्घृततैलवसामज्जाभिर्महान्महास्नेहः स्यादित्यर्थः। "पिबेत् त्र्यहं चतुरहं पञ्चाहं षडहानि वा"। मृदुमध्यक्रूरकोष्ठापेक्षया त्र्यहं चतुरहं पञ्चाहं षडहानि चेति। यदुक्तम् "मृदुकोष्ठस्त्रिरात्रेण स्निग्धस्नेहोपसेवया। मध्यकोष्ठश्चतुर्भिस्तु दिवसैः स्निह्यति ध्रुवम्। पञ्चभिर्वाथ षड्भिर्वा दिनैः क्रूरो विशुध्यति। सप्तरात्रात्परं स्नेहः सात्म्यीभवति सेवितः"। मृदुमध्यक्रूरकोष्ठानां सर्वेषां सप्तरात्रात्परं सात्म्यीभवति वातानुलोम्याग्निदीप्तिकोष्ठशुद्धिमृदुस्निग्धाङ्गतास्वरवर्णाङ्गलाघवधातुपुष्टिद्विजदार्ढ्यनिर्जरताबलवर्णकारी भवति। न तु सप्ताहपरे वातानुलोम्यादीन् करोति। "दोषकालवयोवह्निबलान्यालोक्य योजयेत्। हीनाञ्च मध्यमां ज्येष्ठां मात्रां स्नेहस्य बुद्धिमान्। असात्म्यया तथाऽकाले मिथ्याहारविहारतः। स्नेहः करोति शोफार्शस्तन्द्रानिद्राविसंज्ञिताः। देया दीप्ताग्नये मात्रा स्नेहस्यैकपलोन्मिता। मध्यमाय त्रिकर्षा स्याज्जघन्याय द्विकार्षिकी"। मध्यमाय मध्यमाग्नये जघन्याय हीनाग्नये "अथ वा स्नेहमात्राः स्युस्तिस्रोऽन्याः सर्वसम्मताः। अहोरात्रेण महती जीर्य्यत्यह्ना तु मध्यमा। जीर्य्यत्यल्पा दिनार्द्धेन सा विज्ञेया सुखावहा"। अयमर्थः याहोरात्रेण जीर्य्यति सा मात्रा महती। एवं मध्यमा कनिष्ठा च ज्ञेया "अल्पा स्याद्दीपनी वृष्या स्वल्पदोषे प्रपूजिता। मध्यमा स्नेहनी ज्ञेया वृंहणी भ्रमहारिणी। ज्येष्ठा कुष्ठविषोन्मादग्रहापस्मारनाशिनी"। सुश्रुतः पुनरेवमाह "या मात्रा प्रथमे यामे गते जीर्य्यति वासरे। सा मात्रा दीपयत्यग्निमल्पदोषे च पूजिता। या मात्रा वासरस्यार्द्धे व्यतीते परिजीर्य्यति। सा वृष्या वृंहणी च स्यान्मध्यदोषे प्रपूजिता। या मात्रा चरमे यामे स्थितेऽह्नः परिजीर्य्यति। सा मात्रा स्नेहनी ज्ञेया बहुदोषेषु पूजिता। केवलं पैत्तिके सर्पिर्वातिके लवणान्वितम्। देयं बहुकफे वह्निव्योषक्षारसमन्वितम्। रूक्षक्षतविषार्त्तानां वातपित्तविकारिणाम्। हीनमेधास्मृतीनाञ्च सर्पिःपानं प्रश-